बहुलं लभ्यते । इति भावप्रकाशः ॥

अमृतोत्पन्नं, क्ली, (अमृतं विषमिव उत्पन्नं नीलवर्णत्वात् ।) खर्परीतुत्थं । इति राजनिर्घण्टः ॥

अमृतोत्पन्ना, स्त्री, (अमृतं मधु उत्पन्नं यस्याः सा, "जातिकालसुखादिभ्यो निष्ठायाः परवचनमिति निष्ठायाः परनिपातः" ।) मक्षिका । इति राजनिर्घण्टः ॥

अमृतोद्भवं, क्ली, (अमृतं विषमिव उद्भवति कृष्णवर्णत्वात्, उद् + भू + अप् ।) तुत्थं । खर्परीतुत्थं । इति राजनिर्घण्टः ॥

अमेधाः, [स्] पुं, (नास्ति मेधा यस्य सः, समासान्तः असिच् ।) मूढ़ः । मूर्खः । इति हेमचन्द्रः ॥ ("नमः समस्तात् पूर्व्वस्मा अन्तरस्मा अमेधसाम् । सुमेधसामन्तरस्मै सतां स्वस्मै स्वयम्भुवे" । इति वोपदेवः ।)

अमेध्यं, क्ली, (न मेध्यं पवित्रं विरोधे नञ्समासः ।) पुरीषं । इति शब्दरत्नावली ॥ अपवित्रे त्रि ॥ (अपवित्रं । मलमूत्रादिकं वस्तु ।
"नाग्निं मुखेनोपधमेत् नग्नां नेक्षेत च स्त्रियं ।
नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्" ॥
इति मनुः ।)

अमोघः, त्रि, (न मोघो निष्फलः, नञ्समासः ।) सफलः । अव्यर्थः । इति मेदिनी ॥ गदविशेषे पुं । इति शब्दरत्नावली ॥ (इष्टफलप्रदः । अवन्ध्यः । अविफलः ।
"यदमोघमपामन्तरुप्तं वीजमज त्वया" ।
इति कुमारसम्भवे ।
"अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः" ।
इति रघुवंशे ।)

अमोघा, स्त्री, (न मोघा निष्फला, नञ्समासः ।) पाटलिवृक्षः । विड़ङ्गं । इत्यमरः ॥ हरीतकी । इति मेदिनी ॥

अम्ब गतौ । (इति कविकल्पद्रुमः ।) ओष्ठवर्गशेषोपधः । अम्बति । इति दुर्गादासः ॥

अम्बकं, क्ली, (अम्बति गन्तव्यपर्य्यन्तं गच्छति, अम्ब + ण्वुल् । वा अम्ब्यते भूगर्भे प्राप्यते, अम्ब + कर्म्मणि घञ् स्वार्थे कन् ।) नेत्रं । इति हेमचन्द्रः ॥
"आसीनमासन्नशरीरपात-
स्त्रियम्बकं संयमिनं ददर्श" ।
इति कुमारसम्भवे ।) ताम्रं । इति राजनिर्घण्टः ॥

अम्बरं, क्ली, (अवि शब्दे + भावे घञ्, अम्बः शब्दस्तं राति आदत्ते अम्ब + रा + कः ।) वस्त्रं । ("एवमुक्ता सुमित्रा सा विवर्णा मलिनाम्बरा" । इति रामायणे ।) आकाशं । ("दावाग्निः क्वचमम्बरे" इति साहित्यदर्पणे ।) कार्पासः । स्वनामख्यातसुगन्धिद्रव्यं । इति विश्वः ॥ अभ्रधातुः । इति राजनिर्घण्टः ॥

अम्बरिषं, क्ली, (अम्ब्यते पच्यतेऽत्र, अवि + अरिष वा दीर्घः निपातनात् ।) भर्ज्जनपात्रं । भाजना खोला । इति भाषा । इत्यमरटीकायां रमानाथः ।

अम्बरीषं, क्ली, (अवि + गतौ + कर्म्मणि घञ्, अम्बा अम्बा ईर्ष्या यस्मात् तत्, सिंहवत् पृषोदरादित्वात् रवर्णविपर्य्ययेण साधु ।) भ्राष्ट्रः । भर्ज्जनपात्रं । इत्यमरः ॥ युद्धं । इति मेदिनी ॥

अम्बरीषः, पुं, (अम्ब्यते पच्यते अत्र, निपातनात् साधुः ।) विष्णुः । शिवः । इति त्रिकाण्डशेषः ॥ किशोरः । भास्करः । नृपभेदः । स तु सूर्य्यवंशीयनाभागराजपुत्त्रः ।
("भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः ।
नाभागस्तु श्रुतस्यासीत् पुत्त्रः परमधार्म्मिकः ॥
अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत्" ॥
इति हरिवंशे ।) नरकभेदः ॥ आम्रातकवृक्षः । अनुतापः । इति मेदिनी ॥

अम्बष्ठः, पुं, (अम्बायां मातरि तिष्ठति, अम्बा + स्था + कः, आम्बाम्बेति षत्वं, ङ्यापोः संज्ञाच्छन्दसोर्बहुलमिति ह्रस्वः, असवर्णाजातत्वात् तस्य तथात्वं ।) देशविशेषः । विप्राद्वैश्यायामुत्पन्नः । इति मेदिनी ॥ अयं चिकित्सावृत्तिः वैद्य इति ख्यातः । इत्यमरटीकायां भरतः ॥ हस्तिपकः । यथा,—
"अम्बष्ठाम्बष्ठ मार्गं नौ देह्यपक्राम मा चिरं" ।
इति श्रीभागवतं ॥ कायस्थजातिविशेषः । इति पश्चिमदेशे प्रसिद्धः ॥

अम्बष्ठकी, स्त्री, (अम्बष्ठं कायति स्वग्रहणार्थमाह्वयति, अम्बष्ठ + कै + कः, गौरादित्वात् ङीष् ।) लताविशेषः । आकनादि निमुखी इति च भाषा । तत्पर्य्यायः । पाठा २ अम्बष्ठा ३ कुचेली ४ पापचेलिका ५ एकाष्ठीला ६ वरा ७ तिक्ता ८ प्राचीना ९ एकोशिका १० रुका ११ । इति रत्नमाला ॥ विद्धकर्णी १२ स्थापनी १३ श्रेयसी १४ रसा १५ पापचेली १६ वनतिक्तिका १७ । इत्यमरः ॥ अविद्धकर्णी १८ अविद्धकर्णा १९ । इति तट्टीका ॥ अम्बष्ठिका २० यूथिका २१ विद्धकर्णिका २२ दीपनी २३ तिक्तपुष्पा २४ वृहत्तिक्ता २५ शिशिरा २६ वृकी २७ मालती २८ देवी २९ वृत्तपर्णी ३० । इति राजनिर्घण्टः ॥ अस्या गुणाः । अतीसारशमनत्वं । लघुत्वं । त्रिदोषनाशित्वञ्च । इति राजवल्लभः ॥ तिक्तत्वं । गुरुत्वं । उष्णत्वं । वातपित्तज्वरपित्तदाहशूलनाशित्वं । भग्नसन्धानकारित्वञ्च । इति राजनिर्घण्टः ॥

अम्बष्ठा, स्त्री, (अम्बायां मातरि स्वोत्पत्तिस्थाने इति यावत्, तिष्ठति, अम्बा + स्था + कः, अम्बेत्यादिना षत्वम् पूर्व्ववत् ह्रस्वः, स्त्रियां टाप् ।) क्षुपविशेषः । अम्बाड़ा इति ख्याता । अस्याः पर्य्यायः । वालिका २ वाला ३ शठाम्बा ४ अम्बालिका ५ अम्बिका ६ अम्बा ७ माचिका ८ दृढ़वल्का ९ मयूरिका १० गन्धपत्री ११ चित्रपुष्पी १२ श्रेयसी १३ मुखवाचिका १४ छिन्नपत्री १५ भूरिमल्ली १६ । अस्या गुणाः । कषायत्वं । अम्लत्वं । कफकण्ठरोगवातरोगवलासनाशित्वं । वमिकारित्वञ्च । इति राजनिर्घण्टः ॥०॥ पाठा । आम्नेरी । यूथिका । इत्यमरमेदिनीकरौ ॥

अम्बष्ठिका, स्त्री, (अम्बष्ठा + संज्ञायां कन्, स्त्रियां टाप् ।) अम्बष्ठा । आकनादि इति भाषा । इति राजनिर्घण्टः ॥ ब्राह्मणी । वामनहाटी इति प्रसिद्धा । इति रत्नमाला ॥

अम्बा, स्त्री, (अम्ब्यते स्नेहेनोपगम्यते, अवि गतौ + घञ्, स्त्रियां टाप् ।) जननी । इति शब्दरत्नावली ॥
"अम्ब ! यत्त्वमिदं प्रात्थ प्रशमाय वचो मम" ।
"नान्यदत्तमभीप्सामि स्थानमम्ब स्वकर्म्मणा" ।
इति विष्णुपुराणे ।) नाट्योक्तौ सैव । इत्यमरः ॥ पाण्डुराजमातुः स्वसा । इति महाभारतं ॥ अम्बष्ठा । इति राजनिर्घण्टः । दुर्गा । इति केचित् ॥

अम्बालिका, स्त्री, (अम्बेति शब्दं लाति गृह्णाति, अम्बा + ला + कः, उपपदसमासः, ह्रस्वे अतइत्वं स्वार्थे कन्, स्त्रियां टाप् ।) माता । इति शब्दरत्नावली ॥ अम्बष्ठा । इति राजनिर्घण्टः ॥ पाण्डुराजमाता । इति भारतं ॥ (काशीराजस्य कनिष्ठा दुहिता सा च विचित्रवीर्य्यपत्नी ।
"अम्बालिका च राजेन्द्र ! राजकन्या यवीयसी ।
अम्बिकाम्बालिके भार्य्ये प्रादाद्भ्रात्रे यवीयसे ॥
"भीष्मो विचित्रवीर्य्याय विधिदृष्टेन कर्म्मणा" ।
इति महाभारते ।)

अम्बिका, स्त्री, (अम्बा + स्वार्थे कन्, स्त्रियां टाप् ।) दुर्गा ।
"ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः ।
आशीर्भिरेधयामासुः पुरःपाकाभिरम्बिकाम्" ॥
इति कुमारसम्भवे । माता । इति मेदिनी ॥ जैनदेवीविशेषः । इति हेमचन्द्रः ॥ कटुकीवृक्षः । इति शब्दचन्द्रिका ॥ अम्बष्ठा । इति राजनिर्घण्टः ॥ काशीराजस्य मध्यमादुहिता । विचित्रवीर्य्यस्य पत्नी । धृतराष्ट्रस्य माता ।
"अम्बा ज्येष्ठाऽभवत्तासामम्बिका त्वथ मध्यमा ।
अम्बिकाम्बालिके भार्य्ये प्रादाद्भ्रात्रे यवीयसे ॥
भीष्मो विचित्रवीर्य्याय विधिदृष्टेन कर्म्मणा" ।
इति महाभारते ।)

अम्बिकेयः, पुं, (पाणिनिमते तु अम्बिकाया अपत्यं पुमान्, अम्बिका + ढक् तस्य इयः, ह्रस्वाभावः ।) गणेशः । कार्त्तिकेयः । धृतराष्ट्रराजः ॥ अम्बिकाया अपत्यमित्यर्थे ज्ञेयः ॥

अम्बिकेयकः, पुं, (अम्बिकेय + स्वार्थे कन् ।) गणेशः । इति जटाधरः ॥

अम्बु, क्ली, (अवि शब्दे उण् ।) वालानामौषधिः । इत्यमरः ॥ वाला इति भाषा । जलं ("भुक्ता मृणालपटली भवता निपीतान्यम्बूनि यत्र नलिनानि निषेवितानि" । इति भामिनीविलासे । "अम्बुजमम्बुनि जातं क्वचिदपि न जायतेऽम्बुजादम्बु" । इत्युद्भटः । "गाङ्गमम्बु सितमम्बु यामुनं" । इति काव्यप्रकाशे ।)

अम्बुकण्टकः, पुं, (अम्बुनि जले कण्टकइव, सादृश्यार्थे कन् ।) कुम्भीरः । इति त्रिकाण्डशेषः ॥

अम्बुकिरातः, पुं, (अम्बुनि जले किरातः व्याध इव ।) कुम्भीरः । इति त्रिकाण्डशेषः ॥

अम्बुकीशः पुं, (अम्बुनि कीशः वानर इव ।) शिशु-